# Shri Yogijimaharaja Vandana Ashtakam

# શ્રીયોગિજીમહારાજ વન્દનાષ્ટકમ્

## Document Information

Text title : Shri Yogijimaharaja Vandana Ashtakam

File name : yogijImahArAjavandanAShTakam.itx

Category : deities_misc, svAminArAyaNa, gurudev, aShTaka

Location : doc_deities_misc

Author : vivekasAgarasvAmi

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

Shri Yogijimaharaja Vandana Ashtakam

# શ્રીયોગિજીમહારાજ વન્દનાષ્ટકમ્

(શાર્દૂલવિક્રીડિતમ્)
શ્રીજીશ્રીપદપઙ્કજેન પુનિતા સૌરાષ્ટ્ર-દેશસ્થ ભૂઃ
યસ્યાં પ્રાદુરભૂત્ સ્વયં મુનિગુણાતીતશ્ચ મુક્તાઃ ક્ષિતૌ ।
તસ્મિન્ ધારિપુરે ત્વજાયત યતિર્વૈરાગ્યમૂર્તિઃ સ્વયં
તં શ્રીજ્ઞાનજિયોગિનં ગુરુવરં વન્દે સદા ભક્તિતઃ ॥ ૧॥

રત્વા બાલ્યવયઃ પ્રિયં સ્વસદનં ત્યક્તં ત્વયૈકાદશે
સમ્મૃગ્યાતિશુચં ગુરું પ્રમુદતઃ શ્રીજીર્ણદુર્ગેઽવસત્ ।
દીક્ષાં ભાગવતીં પ્રધાય વિમલાં સ્વસ્થાનમધ્યે સ્થિતસ્
તં શ્રીજ્ઞાનજિયોગિનં ગુરુવરં વન્દે ત્વહો સર્વદા ॥ ૨॥

આકર્ષન્તિ સુલોહકાન્તમણયો લોહં યથાગત્ય વૈ
સ્થાનં શાશ્વતમાપ્ય સન્ સ્થિરતમઃ કૃત્વાચ વૃત્તિં સ્થિરામ્ ।
ધ્યેયં શ્રીગુરુરાજ-યજ્ઞપુરુષસ્યાસેવનં ધાર્યતે
તં શ્રીજ્ઞાનજિયોગિનં ગુરુવરં વન્દે સદા ભાવતઃ ॥ ૩॥

ધર્મે પ્રેમ ધરન્ હરેસ્સુવચને શ્રદ્ધાં ચરન્ શાશ્વતં
પ્રજ્ઞાનેન ચ પૂર્ણજીવિતમપિ પ્રકૃષ્ટ-નિર્માનિતા ।
વૈરાગ્યે રતિરસ્ય તીવ્રસબલા ત્યાગં સદા શોભિતું
તં શ્રીજ્ઞાનજિયોગિનં ગુરુવરં ભાવેન વન્દે સદા ॥ ૪॥

સ્વામિ-શ્રીહરિભક્તિમેવ નવધા પ્રેમ્ણા વિધત્તે સદા
મિષ્ટાન્નં પરિવેષયન્વદતિ યઃ સ્વામિન્ હરે ખાદતાત્ ।
ભોજ્યં શીતજલં દદાતિ સમયે સેવાં કરોત્યાદરાત્
તં શ્રીજ્ઞાનજિયોગિનં ગુરુવરં વન્દેઽનિશં ભાવતઃ ॥ ૫॥

વાણી દિવ્યસુધાભર મધુસમા સઞ્જીવની સંક્ષિતૌ
દ્રષ્ટાવસ્તિ સુદિવ્યતા હરિજનાન્ દ્રષ્ટું ચ દિવ્યં સમાન્ ।
સ્નેહો માતૃસમઃ પ્રિયશ્ચ હૃદયે હાસ્યં મુખે રાજતે

તં શ્રીજ્ઞાનજિયોગિનં ગુરુવરં ભાવેન વન્દે સદા ॥ ૬॥

લબ્ધ્વા બ્રહ્મપદં દધાતિ સતતં વૃત્તિં દ્રઢાં શ્રીહરૌ
ધ્યાને મત્ત ઇહાત્મનિ પ્રરમતે ભાવેન મત્તેન યઃ ।
ધત્તે શ્રીહરિકૃષ્ણમેવ હૃદયે દાસત્વ-ભાવેન વૈ
તં શ્રીજ્ઞાનજિયોગિનં ગુરુવરં વન્દે સદા ભાવતઃ ॥ ૭॥

સાક્ષાદક્ષર-મન્દિરે પ્રતિદિનં ધત્તે મહાપૂજનં
પ્રેમ્ણા ગાયતિ સદ્યશો ભગવતઃ પ્રત્યક્ષમૂર્તેર્મુદા ।
ભાવં યોઽભિનવં દધત્ સ્વહૃદયે ગુર્વિન્દ્રસેવાકૃતે
તં શ્રીજ્ઞાનજિયોગિનં ગુરુવરં ભક્ત્યા ભગો વન્દતે ॥ ૮॥

ભાવેન નત્વા ગુરુયોગિરાજં
શ઼ૃણોતિ ગાત્યષ્ટક-મેકચેતાઃ ।
ધર્મપ્રભૃતીન્ ચતુરો ગુણાન્ દ્રાક્
બ્રાહ્મીં સ્થિતિં પ્રૈતિ જનઃ સ નૂનમ્ ॥ ૯॥

ઇતિ શ્રીવિવેકસાગરસ્વામિવિરચિતં શ્રીયોગિજીમહારાજવન્દનાષ્ટકં સમ્પૂર્નમ્ ।
શ્રી ભગવતીપ્રસાદ પણ્ડ્યા (અમદાવાદ) (વસન્તતિલકા)
તાલિપ્રદાન-રણિતૈર્ગમિતાન્ધકારં
સ્નિગ્ધ-પ્રસન્નવચનૈર્મુદિતાન્તરાલમ્ ।
દિવ્યં પ્રસન્નવિભવં ચ વિશાલભાલં
યોગીશ્વરં પ્રણુત હે મનુજાઃ સતાલમ્ ॥ ૧॥

યોઽસાવમાન્યપિ દદાતિ પરસ્ય માનં
તાપં સહિષ્ણુરપિ હન્તિ જનસ્ય તાપમ્ ।
લોકાન્ નમન્નપિ સમુન્નમયન્ સ લોકાન્
સ્વીયૈર્ગુણૈરચકિતશ્ચકિતાન્ કરોતિ ॥ ૨॥

(ઉપજાતિવૃત્તમ્)
પર્યાપ્તકામોઽપિ વિધૂતકામો, વિશાલચિત્તોઽપિ નિરુદ્ધચિત્તઃ ।
સન્ન્યસ્તકર્માપિચ કર્મયોગી, યોગી પરં મોહતમોવિયોગી ॥ ૩॥

(શાર્દૂલવિક્રીડિતમ્)
પૂજ્ય કાશિકાનન્દજી મહારાજ (મુમ્બઈ) (શાર્દૂલવિક્રીડિતમ્)
દૃષ્ટિર્યસ્ય શિશોરિવાતિસરલા વાણી પુનર્નિશ્છલા
ભાવોઽગાધતલઃ પરાત્મનિ પરા ભક્તિઃ સદા નિર્મલા ।

નિષ્ઠા ચાવિકલા સતાં પથિ તથા કીર્તિઃ શુભાનાવિલા
શીલઃ સંયમિનાં વરઃ સ વિદિતો યોગી ગુણૈરુજ્જ્વલઃ ।
ભક્તિજ્ઞાનવિરાગ-ધર્મનિલયં, સ્મેરાનનં શાન્તિદં
શ્રીમદ્યજ્ઞપુરુષ-કૃષ્ણજિપ્રિયં, પૂજારતં શ્રીહરૌ ।
શ્રીજીવાક્યગરિષ્ઠ-સ્વામિવચનૈ,ર્ભક્તાર્તિબન્ધાપહં
યોગેન્દું નનુ જ્ઞાનજીવનમુનિં, વન્દે મનોજ્ઞં મુદા ॥

*Shri Yogijimaharaja Vandana Ashtakam*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*